# Shiva Manasa Puja or Atmapuja Stotram

# શિવમાનસપૂજા અથવા આત્મપૂજાસ્તોત્રમ્

## Document Information

Text title : Shiva Manasa Puja or Atmapuja Stotram

File name : shivamAnasapUjA.itx

Category : shiva, kRiShNAnandasarasvatI

Location : doc_shiva

Author : Krishnanandasarasvati

Proofread by : PSA Easwaran

Description-comments : Brihatstotraratnakara 1 newer, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 225

Latest update : March 25, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# શિવમાનસપૂજા અથવા આત્મપૂજાસ્તોત્રમ્

શ્રીગણેશાય નમઃ ॥

ૐ પ્રત્યક્પ્રવણધીવૃત્ત્યા હૃદ્ગુહાન્તઃપ્રવેશનમ્ ।
મણ્ડપાન્તઃપ્રવેશોઽયં પૂજાર્થં તવ શઙ્કર ॥ ૧॥

ગુરુવાક્યેષુ વિશ્વાસઃ સ્થિતિરાસનસંસ્થિતિઃ ।
સર્વસઙ્કલ્પસન્ત્યાગઃ સઙ્કલ્પસ્તવ પૂજને ॥ ૨॥

સર્વાધારસ્ત્વમેવેતિ નિશ્ચયઃ પીઠપૂજનમ્ ।
ધ્યાનધ્યાતૃધ્યેયબાધો ધ્યાનમાનન્દકારણમ્ ॥ ૩॥

દૃશ્યપ્રમાર્જનં ચિત્તાન્નિર્માલ્યસ્ય વિસર્જનમ્ ।
અહં બ્રહ્મેત્યખણ્ડા યા વૃત્તિર્ધારાભિષેચનમ્ ॥ ૪॥

પૃથિવ્યાત્મકતા દૃષ્ટિસ્તવ ગન્ધસમર્પણમ્ ।
બોધોપશમવૈરાગ્યં ત્રિદલં બિલ્વમર્પયે ॥ ૫॥

આકાશાત્મકતાબોધઃ કુસુમાર્પણમીશ્વર ।
જગદાકાશપુષ્પાભમિતિ પદ્મં સમર્પયે ॥ ૬॥

વાયુતેજોમયત્વં તે ધૂપદીપાવનુત્તમૌ ।
દૃશ્યાસમ્ભવબોધેન નિજાનન્દેન તૃપ્તતા ॥ ૭॥

સર્વતઃ પ્રીતિજનકં નૈવેદ્યં વિનિવેદયે ।
જલાત્મકત્વબુદ્ધિસ્તુ પીયૂષં તેઽર્પયે પિબ ॥ ૮॥

કર્તવ્યેષ્વપ્રસક્તિસ્તુ હસ્તપ્રક્ષાલનં તવ ॥ ૯॥

દુર્વાસનાપરિત્યાગસ્તામ્બૂલસ્ય સમર્પણમ્ ।
વાચાં વિસર્જનં દેવ દક્ષિણા શ્રુતિસમ્મતા ॥ ૧૦॥

ફલાભિસન્ધિરાહિત્યં ફલાર્પણમનુત્તમમ્ ।
અહમેવ પરં બ્રહ્મ સચ્ચિદાનન્દલક્ષણમ્ ॥ ૧૧॥

એવં નિદિધ્યાસવાક્યં સ્તુતિઃ પ્રિયકરી તવ ।
નામરૂપાણિ ન ત્વત્તો ભિન્નાનીતિ મતિસ્તુ યા ॥ ૧૨॥

તવ પુષ્પાઞ્જલિઃ શમ્ભો સર્વત્રોત્કીર્ણપુષ્પકઃ ।
સ્વપ્રકાશાત્મબુદ્ધિસ્તુ મહાનીરાજનં તવ ॥ ૧૩॥

પ્રાદક્ષિણ્યં સર્વતસ્તે વ્યાપ્તિબુદ્ધિઃ સ્મૃતં શિવ ।
ત્વમેવાહમિતિ સ્થિત્યા લીનતા પ્રણતિસ્તવ ॥ ૧૪॥

શુદ્ધસત્ત્વસ્યાભિવૃદ્ધિશ્છત્રં તાપાપનોદનમ્ ।
રજસ્તમસ્તિરસ્કારશ્ચામરાન્દોલને તવ ॥ ૧૫॥

નિજાનન્દપરાઘૂર્ણદોલનાન્દોલને વસ ।
ધન્યોઽહં કૃતકૃત્યોઽહમિતિ ગાનં તવ પ્રિયમ્ ॥ ૧૬॥

નિરઙ્કુશં મહાતૃપ્ત્યા નર્તનં તે મુદે શિવ ।
નાનાવિધૈઃ શબ્દજાલૈર્જૃમ્ભણં વાદ્યમુત્તમમ્ ॥ ૧૭॥

શબ્દાતિગત્વબુદ્ધિસ્તુ કલ્યાણમિતિ ડિણ્ડિમઃ ।
વેગવત્તરગન્તાઽસૌ મનોઽશ્વસ્તે સમર્પિતઃ ॥ ૧૮॥

અહમ્ભાવમહામત્તગજેન્દ્રો ભૂરિલક્ષણઃ ।
તત્ર દેહાદ્યનારોપનિષ્ઠા દૃઢતરોઽઙ્કુશઃ ॥ ૧૯॥

અદ્વૈતબોધદુર્ગોઽયં યત્ર શત્રુર્ન કશ્ચન ।
જનતારામવિસ્તારો રમસ્વાત્ર યથાસુખમ્ ॥ ૨૦॥

કલ્પનાસમ્પરિત્યાગો મહારાજ્યં સમર્પયે ।
ભોક્તૃત્વાધ્યાસરાહિત્યં વરં દેહિ સહસ્રધા ॥ ૨૧॥

અખણ્ડા તવ પૂજેયં સદા ભવતુ સર્વદા ।
આત્મત્વાત્તવ મે સર્વપૂજૈવાસ્તિ ન ચાન્યથા ॥ ૨૨॥

ઇમાં પૂજાં પ્રતિદિનં યઃ પઠેદ્યત્રકુત્રચિત્ ।
સદ્યઃ શિવમયો ભૂત્વા મુક્તશ્ચરતિ ભૂતલે ॥ ૨૩॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યશ્રીમત્કૃષ્ણાનન્દ-
સરસ્વતીવિરચિતા શિવમાનસપૂજા સમાપ્તા ।

Proofread by PSA Easwaran

*Shiva Manasa Puja or Atmapuja Stotram*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*